प्रवेश सं० ४०४०७ विषय: वेद क्रम सं०

ग्रन्थ कौशीकाज्यतंत्र प्रयोग. आथर्ववेदिनाम प्रयोग दीपस्वः ग्रन्थकार देवभद्र:

पत्र सं० १-१०

श्लोक सं० अक्षर सं० (पृष्ठ) ४३ पंक्ति सं० (पृष्ठे) ✓

आकार ११.२ X ७.२ लिपि: दे.ना. आधार: ३७.

वि० विवरणम्

001802

पी० एस० यू० पी०—३५ एम० सी० ई०—१९५९—५०,०००

ना. ७३/२०४

Indira Gandhi National Centre for the Arts

देवभट्ट

अथर्ववेदी कौशिकाज्यतंत्रप्रयोग

Indira Gandhi National
Centre for the Arts

स्मिक्॥ ॐ उद्वयधीरांनुपर्वन्। यासां सोमः परिराज्यं बभूवामन्यता नो वीरुधो भवंतु॥ दर्भाहारस्तस्मै मातरमोत्तरतो निदध
पयारयति। संभारान्संभरति। परिभोजनीयाद्दर्भाः। पवाः मिमानं नदीवालुकाः। खनित्रं पांसवः। लेखनं वीरणः सद
विकंलघुपात्रं। कर्मपर्यायम् पुरुकं। शस्वपात्रं। अग्निः। समिद्घृतुष्टं। रोहितमानडुहं चर्म। हविर्द्रव्यं तंदुलाः उलूखलं
मुसलं। शूर्पं। प्रोक्षणीयं वस्त्रखंडं। तंदुलप्रक्षालनपात्रं। चरुस्थालीनिस्तरणासल्वजाः पंचेध्माः। सल्वजं बर्हिः प्र
थमलूनदर्भमुष्टिः। चंदनं। रक्तपुष्पाणि। विलीनं घृतमाज्यं। स्रुवः। आज्यापनोदपात्रं उपमार्दकं। स्रुक्। संस्रावीपाज्य
पात्रं चित्तस्यः समिधः परीपात्रं दक्षिणा॥ इति संभारफक्किकाः पंचविंशत्। ग्रीष्मस्तेभूमउपस्थाय। ग्रीष्मस्तेः एम
यत्रो भूमिः पंक्तिः। ॐ ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमंतः शिशिरो वसंतः। ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवि नो दु १
हाना। मिमानमारोय। विमिमीष्व पयस्वतीमिति मिमानमनुमंत्रयेत। विमिमीष्व ब्रह्मा रोहितादिस्मात्त्रिष्टुप्। ॐ वि
मिमीष्व पयस्वतीं घृताचीं देवानां धेनुरनपस्पृगेषा। इंद्रः सोमं पिबतु क्षेमो अस्त्वग्निः प्रस्तौतु विमृधो नुदस्वाएयुसं

मितां वेदिं विदध्यात्। षट्शमी प्रागायताः। प्रथमः। द्वितीयः। तृतीयः। चतुर्थः। पंचमः। षष्ठः। चतुःशमी श्रोण्यां।
प्रथमः। द्वितीयः। तृतीयः। चतुर्थः। श्रोण्यां प्रथमः। द्वितीयः। तृतीयः। पुनर्मध्येऽर्वेनः। प्रथमः। द्वितीयः। तृतीयः।
अर्द्धे चतुर्थाननतः। प्रथमः। द्वितीयः। तृतीयः। अर्द्धः नदीवालुकपांसवैस्तोरखां कृत्वा। बृहस्पते कौशिको लिंगोक्ता
त्रिष्टुप्। ॐ बृहस्पते परिगृहाण वेदिं सुगा वो देवाः सदनानि संतु। अस्यां बर्हिः प्रथतां साध्वंतरहिंस्राणः पृथिवी देवी
देव्यस्तु। इति परिगृह्णाति। यत्ते भूमे इति विखनति। यत्ते भूमेः अथर्वा भूमिरनुष्टुप्। ॐ यत्ते भूमे विखनामि क्षिप्रं तदपि
रोहतु। मा ते मर्म विमृग्वरि मा ते हृदयमर्पिपं। यत्कृतमिति संवपति यत्कृतं अथर्वा भूमिस्त्रिष्टुप्। ॐ यत्कृतं ततं
आवपामि प्रजापतिः प्रथमजा ऋतस्य त्वमस्या वपनी जनानामिति ततः पांशून्यतो वा हार्यत्वमस्याथर्वा भू
मिपंक्तिः। ॐ त्वमस्या वपनी जनानामदितिः कामदुघा पप्रथाना। वेदिं मुच्चां कृत्वा। अपाराणां पुरस्तादुत्तरखं वेदिं विदध्या
त्। वेदिः शमीमाऽऽयतनामज्यो। प्रथमः। द्वितीयः। अर्द्ध एकशमी श्रोण्यां। प्रथमः। अर्द्धः पुरस्तात्तिर्यक्। प्रथमः। चत्वारि
गुलानि रखां कृत्वा। पांसून्न्यस्य। बृहस्पते परिगृहाण वेदिमिस्युत्तरवेदिं मोप्यमानां परिगृह्णाति। बृहस्पते कौशि
को लिंगोक्ता त्रिष्टुप्। ॐ बृहस्पते परिगृहाण वेदिं सुगा वो देवाः सदनानि संतु। अस्यां बर्हिः प्रथतां साध्वंतरहिंस्राणः पृ
थिवी देवी देव्यस्तु। असंबाधं मध्यतो मानवानामिति मध्यपाति। असंबाधमथर्वा भूमिस्त्रिष्टुप्। ॐ असंबाधं मध्यतो
मानवानां यस्या उद्वतः प्रवतः समं बहु। नाना वीर्या ओषधीर्या बिभर्ति पृथिवी नः प्रथतां राध्यतां नः। यस्याश्चतस्रः प्रदिशः
पृथिव्या इति चतुरस्रां करोति। यस्याश्चतस्रोऽथर्वा भूमिस्त्रिष्टुप्। ॐ यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः सं
बभूवुः। या बिभर्ति बहुधा प्राणदेजत्सा नो भूमिर्गोष्वप्यन्ने दधातु। देवस्य त्वा कौशिकः सविता गायत्री। ॐ देवस्य त्वा स
वितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति लेखनमादाय। पत्राग्निं निधास्यन्नवदिति तत्र लक्षणीकरोति। इं
द्रः सीतां निगृह्णात्विति दक्षिणत आरभ्योत्तरत आलिखति। इंद्रः सीतां विश्वामित्रः सीतानुष्टुप्। ॐ इंद्रः सीतां निगृ

Indira Gandhi National
Centre for the Arts

कौ·सू·भा· स्फातुं तां पूषाभिरक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां। उत्तरतः प्राचीमालिखन्तीन्द्रः सीतामिति। इन्द्रः सीतां वि
२ श्वामित्रः सीता निचृत्। ॐ इन्द्रः सीतां निगृह्णातु तां पूषाभिरक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां। आग्नेय्या दक्षिण
तः प्राचीमालिखन्तीन्द्रः सीतामिति। इन्द्रः सीतां विश्वामित्रः सीता अनुष्टुप्। ॐ इन्द्रः सीतां निगृह्णातु तां पूषाभिरक्षतु।
सा नः पयस्वती दुहामुत्तरामुत्तरां समां। अपराह्णिमो मध्यमस्कंधस्था प्राचीरालिखन्तीन्द्रः सीतामिति मंत्रावृत्त्या। इन्द्रः
सीतां विश्वामित्रः सीता अनुष्टुप्। ॐ इन्द्रः सीतां निगृह्णातु तां पूषाभिरक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां। ३। ॐ इन्द्र
ः सीतां निगृह्णातु तां पूषाभिरक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां। ४। ॐ इन्द्रः सीतां निगृह्णातु तां पूषाभि
रक्षतु। सा नः पयस्वती दुहामुत्तरामुत्तरां समां। ५। यस्यां व्रीहियवावोप्य वैश्वानरा भूमिः पृथिवी देवता त्रिष्टुब्भिः संप्रोक्ष्या व
श्वानरा भूमिरथर्वा भूमिस्त्रिष्टुप्। ॐ वैश्वानरा भूमिः पृथिवी नक्ता व्रतानां तोरधातुभद्रयो मित्रयधामनिधामानो। इति मन्त्री। प्र
स्यामग्नेत्येति पवाविति नमस्कृत्य प्रस्यामथर्वा भूमिरनुष्टुप्। ॐ प्रस्यामग्नेचीयते यस्याद्भाः पंचकृष्टयः। अस्यै पर्जन्य
पत्न्यै नमोऽस्तु वर्षमेदसे। अथाग्निं प्रणयेत्। त्वामग्ने भृगवः कौशिको ग्निः पंक्तिः। ॐ त्वामग्ने भृगवो नयन्तामांगिरसः
सुरत्नं स्त्रैयरोहि। विश्वकर्मा पुरगाग्निर्जातान्विश्वं यथामनुते दिशाम। अग्ने पेहीति वा मंत्रेण प्रणयेत्। अग्ने पेहि भृग्वंगि
रास्त्रिष्टुप्। ॐ अग्ने पेहि प्रथमो देवतानां चक्षुर्देवानामुत मानुषाणां। इयक्षमाणा भृगुभिः सजोषाः स्वर्यन्तु यजमानाः स्वस्ति।
अग्नेः स्थापनं। अहो भवाग्न्यायो भव। स्वस्तो भव विश्वंभरा वसुधानी प्रतिष्ठेति लक्षणोपलिप्तयं। विश्वंभरा अथर्वाग्निस्त्रि १म·
ष्टुप्। ॐ विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी। वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधा २
तु। ममाग्ने वर्च इति समिध आधाय यजमानः। ममाग्ने वर्चो अथर्वाग्निस्त्रिष्टुप्। ॐ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वे
न्धानास्तन्वं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम। अग्ने व्रतपते इति वा तेन त्वं व्रतपत इ
ति वा समिधमाधाय यजमानः। व्रतेन त्वमथर्वाङ्गिरसावाग्निस्त्रिष्टुप्। ॐ व्रतेन त्वं व्रतपते समक्तो विश्वाहा सुमना दीदि

हीह। तं त्वा वयं जातवेदः समिद्धं प्रजावन्त उपसदेम सर्वे प्रथमः। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ता
भ्याममुकाय जुष्टं निर्वपामि वक्ता वाचं यच्छति। कर्मणे वां वेषाय वां सुकृताय वामिति पाणी प्रक्षाल्य। कर्मणे कौशि
को लिंगोक्ता अनुष्टुप्। ॐ कर्मणे वां वेषाय वां सुकृताय वां प्रक्षालयामि। इति मन्त्री। अपरेणाग्निं दर्भानास्तीर्य तेषू
त्तरमानउदहोदितं चमीस्तीर्य। पवित्रे कुरुते। दर्भाव प्रछिन्नपानौ प्रक्षाल्य त्रिः अनुलोममनुमार्ष्टि विष्णोः कौ
शिको विष्णुगायत्री। ॐ विष्णोर्मनसा पूते स्थः॥ चभूमिमसेधि भृगुर्लिंगोक्ता पांक्तिः। ईत्वं भूमिमसेध्वा जसा
त्वेवासीरसि चारुरध्वरे। तां पवित्रमथर्वा यो भरंतः पुनीहि दुरितान्यस्मत्। इति पवित्रान्तर्हितायां हविर्निर्वपति।
देवस्य त्वा कौशिकः सविता छंदः कल्पनीयं सर्वत्र। ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याममुकाय जु
ष्टं निर्वपामि प्रथमो वमुनरता मम। द्वितीयः ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याममुकाय जुष्टं निर्व
पामि। तृतीयः। तूष्णीं चतुर्थं। अमुकदेवप्रधानदेवतादेशः सर्वत्र। निरुप्तं पवित्राभ्यां प्रोक्ष्य सनुषैस्त्वा जुष्टमिति प्रथारे
वनकर्मायोर्देकेनासंस्कृतेन प्रोक्षणं। देवस्य त्वा कौशिकः सविता। छंदः कल्पनीयं सर्वत्र। ॐ देवस्य त्वा सवितुः प्रसवेऽश्वि
नोर्बाहुभ्यां पूष्णो हस्ताभ्याममुकाय त्वा जुष्टं प्रोक्षामि। इति मन्त्री। त्रिः संभारान्प्रोक्ष्य पवित्रे यजमानसमीपे निः२
धाति। उलूखलमुसले शूर्पं तत्रैव यद्यन्नकृत्स्मइति प्रसाद्य। यद्यत्स्मो यमः सगोरः नाग्निस्त्रिष्टुप्। ॐ यद्यन्नकृत्स्मः शकुनर
हगता न्सर्वं वक्त्रे विल आससार। यद्वा दास्या हस्तासमंक्त उलूखलं मुसलं शुंभताप। इति मन्त्री। शूर्पं पलाशिकं इति प्रसा
ल्यय। त्वा शिकोवस्पतिर्वनस्पतिरनुष्टुप्। ॐ प्रत्या शिकः परावधीत्सा हस्तेन वाम्या। आपस्त्वा तस्माज्जीवनाय नेनुशु
चयः शुचि। इति मन्त्री प्रक्षालिना निपोंछ्यन्। उलूखलमुसलं शूर्पं प्रक्षालितं चर्मणि पाधाय। व्रीहीनुलूखलं इत्य अ
वृधं त्रिष्टुप्। हविः कृता वाचं विसृजति हविः कृदाह्वयतीति। हविः कौशिको लिंगोक्ता जगती। ॐ हविः कृदाह्वेहि ॐ हविः कृदाह्वयद
वेहीति। नोग्निसर्गः कुर्युः। यजमानस्त्रिस्तूष्णीमवहंति अपहस्तमुफलीकृतान्कृत्वा वेदे दर्भोरिरवहिः कृता प्रक्षाल्यतं

...tional
Centre for the Arts

कौ॰सू॰भा॰ तुलान्यत्वा शिक्य इति मन्त्रा शिक्यो बृहस्पतिर्वनस्पतिरनुष्टुप् ॥ ॐ पला शिक्यः पयसा पीनसा हस्ते वनस्पत्या आपस्त्वा
३ तस्माज्जीवलाः पुनन्तु शुचयः शुचिं ॥ द्रुह्यस्व ॥ अग्नेश्चरुं यज्ञियस्त्वाध्यरुक्षदिति चरुमधिश्रयाति ॥ अग्नेश्चरुर्यज्ञमग्नेलो
दनिकस्त्रिष्टुप् ॥ ॐ अग्नेश्चरुं यज्ञियस्त्वाध्यरुक्षच्छुचिस्तपिष्ठस्तपसा तपैनं । आर्षेया दैवा अभिसंगत्य भागमिमं त
पिष्ठा ऋतुभिस्तपन्तु ॥ शुद्धाः पूता इत्युदकमासिंचति पवित्रे अन्तर्धाय । शुद्धा ब्रह्मा चरुसोदनिकस्त्रिष्टुप् ॥ ॐ शुद्धाः पूता योषि
तो यज्ञिया इमा आपश्चरुमवसर्पन्तु शुभ्राः । अदुः प्रजां बहुलां पशून्नः पक्तौदनस्य सुकृतामेतु लोकं ॥ ब्रह्मणा शुद्धा इ
ति तंडुलान्प्रक्षिप्य अन्तर्धाय । ब्रह्मणा शुद्धा ब्रह्मा ब्रह्मौदनिकोऽतिजगती ॥ ॐ ब्रह्मणा शुद्धा उत पूता घृतेन सोमस्यां
शवस्तंडुला यज्ञिया इमे । अपः प्रविशत प्रति गृह्णातु वश्चरुरिमं पक्त्वा सुकृतामेत लोकं ॥ परित्वाग्ने पुरं वयमिति त्रिः
पर्यग्निकरोति ॥ परित्वाग्नेऽथर्वाग्निरनुष्टुप् ॥ ॐ परित्वाग्ने पुरं वयं विप्रं सहस्य धीमहि । धृषद्वर्णं दिवे दिवे हन्तारं
भंगुरावतः ॥ द्रुह्यस्व ॥ नेक्षणेन त्रिः प्रदक्षिणमुदायौति ॥ अत ऊर्ध्वं यथाकामं ॥ उत्तरतोग्नेरुपसादयतीध्मं । उत्तरं
बर्हिः । इध्मं प्रोक्षति विस्रंस्य । आगन्ये कौशिको ग्निर्जगती ॥ ॐ अग्नये त्वा जुष्टं प्रोक्षामि ॥ द्रुह्यस्व ॥ पृथिव्या इति बर्हिः
पृथिव्यै कौशिकः पृथिवी बृहती ॥ ॐ पृथिव्यै त्वा जुष्टं प्रोक्षामि ॥ द्रुह्यस्व ॥ त्रिर्दर्भमुष्टिमभ्युक्ष्य पश्चादग्नेः प्रागग्र
न्निदधात्यूर्णम्रदसं प्रथस्व स्वासस्थं देवेभ्य इति । ऊर्णम्रदसं कौशिको लिंगोक्ता अनुष्टुप् ॥ ॐ ऊर्णम्रदसं प्रथस्व स्वासस्थं देवे
भ्यः । दर्भाणामुपरि पञ्चपूलीर्णां प्रस्तरोऽसीति दक्षिणातोग्नेर्ब्रह्मासनं निदधाति । सर्वेषामाभव प्रजापतिर्गायत्री एम॰
ॐ ऋषीणां प्रस्तरोऽसि नमोऽस्तु दैवाय प्रस्तराय । यजमानोग्नेरुत्तरतो ब्रह्माणं वृणीते । अमुकसगोत्र अमुकशर्मन् अ २
मुककर्मणि इहं पश्य ॥ भूपते कौशिको ब्रह्मा लिंगोक्ता ॥ ॐ भूपते भुवनपते भुवां पते महतो भूतस्य पते ब्रह्माणं त्वा
वृणीमहे । वृतो जपति । अहं भूपतिः अहं भूपतिः कौशिको लिंगोक्तो अनुष्टुप् ॥ ॐ अहं भूपतिरहं भुवनपतिरहं भुवो
पतिरहं महतो भूतस्य पतिस्तदहं मनसेमं ब्रवीमि मनो वाचे वाग्गायत्र्यै गायत्र्यस्मिन्नुष्णिगनुष्टुभेऽनुष्टुब्बृहत्यै बृह

नीयं छन्दः पंक्ति त्रिष्टुभे त्रिष्टुब्जगत्यै जगती प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यस्तु भूर्भुवः स्वर्नमोनमो नमः पृथुप्रभैः पृजने ब्रह्म
णः ॥ ब्रह्मा पश्चैर्णाग्नेर्दक्षिणातिक्रामति । अहे कौशिको ब्रह्मा गायत्री ॥ ॐ अहे दैधिषव्योदतस्तिष्ठान्यस्य सदने सी
द योऽस्मत्पाकतरः इति ब्रह्मासनमुपवीक्षते । निरस्तः कौशिको लिंगोक्ता त्रिष्टुप् ॥ ॐ निरस्तः पराः वसुः सहपाप्मना नि
रस्तः सोऽस्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । इति दक्षिणात्तृणं निरस्यति सव्यहस्तेन । अप उपस्पृश्य । तद्वालभ्य जपति । इद
महं कौशिको लिंगोक्ता धृतिः ॥ ॐ इदमहमर्वावसोः सदने सीदामि सस्य सदने सीदामि इदस्य सदने सीदामि पर्वतस्य
सदने सीदामि मामस्य देवबर्हिः स्या सस्यत्वाद्धारे पर्णमन्तरमनभिशोकं ॥ विमृग्वरीमित्युपविश्य ॥ विमृग्वरीमथ
र्वा भूमिस्त्रिष्टुप् ॥ ॐ विमृग्वरीं पृथिवीमावदामि क्षमां भूमिं ब्रह्मणा वावृधानां । ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं
त्वाभिनिषीदेम भूमे । आ मनीषं ब्रह्मजपं जपति । बृहस्पतिः कौशिको ब्रह्मा बृहती ॥ ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आ
सिष्यते बृहस्पते यज्ञं गोपाय पृथुदत्तदुन्नमतः शकेयम् । पात कौशिको लिंगोक्ता पंक्तिः ॥ ॐ पात मा द्यावापृथिवी
वाद्य मः इतं द्यावापृथिवी मोस्मोस्तते । ब्रह्मा परिस्तरणीहोनिसंप्रेष्यति । परिस्तरणीः सर्वा लिंगोक्ता त्रिष्टुप् ॥ ॐ प
रिस्तृणीत परिधत्ताग्निं परिहितमग्निं यजमानाय कर्म । तेभ्य आपो हरतां । होत्रानं हरिन्तं हिरण्यपर्णमित्या एते यजमानस्य
लोके । परिस्तरणाति कर्तारि देवस्यत्वा कौशिकः सविता अनुष्टुप् ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां प्रसूतः प्रशिषा परिस्तरणामि । पुरस्तादग्नेरुदगग्रैरासीये तेषां मूलान्यपरेषां प्रान्तैरवच्छादयाति । पुनः । ॐ
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः प्रशिषा परिस्तरणामि । इति त्रिः पुरस्तात् । परिसर्पति
दक्षिणान्निमाय पश्चाद्धानि । एवं प्रागग्रैस्त्रिर्दक्षिणतः । त्रिः पश्चात् । एवमुत्तरतो युज्जोधात्तन्तुर्वन् । पुनः प्रस्तरणा त्र
दक्षिणान्तरं करोति इदस्त
रणं प्रेषः पुनर्देवस्य त्वेति त्रिः पश्चात् । त्रिरुत्तरतः । त्रिः पुरस्तादुदगग्रैः । पत्रसमागतासितदक्षिणान्तरं करोति इदस्त
स्तरणपादन्तकृतो भाष्यस्य । कृतं अष्टादशास्तिपिप्रतिस्तरणं देवस्य त्वेति मन्त्राहतिर्भवति । आम्नाते

...tional
Centre for the Arts

कौ·सू·भा· हारश्मस्तरणांवस्थामः।स्तीर्णोमोसतिहविषांत्वानुष्टंस्योसामीति।हविषांकौशिकोबर्हिर्जगती।ॐहविषांत्वानुष्टःस्योसा
४ मि।द्विस्तृणी।विलीनघृतमाज्यंगृहीत्वा।धिष्ण्यि।तूष्णींपर्यग्निकृत्वा।उत्पूतस्यपश्चात्तेनस्यसाद्य।उत्पवनाभ्यां
पवित्राभ्यामुत्पुनाति।विष्णोः कौशिकोविष्णुर्जगती।ॐविष्णोर्मनसापूतमसि।प्रथमं।देवस्त्वाकौशिकःसविताद्वह·
ती।ॐदेवस्त्वासवितोत्पुनातु।द्वितीयं।अच्छिद्रेणकौशिकोलिंगोक्तागायत्री।ॐअच्छिद्रेणत्वापवित्रेणशतधारेणस·
हस्रधारेणसुपोत्पुनामि।तृतीयं।तूष्णींचतुर्थं।भस्ततंहविरभिधारयतिमध्वासमंजन्घृतवत्करणथेति।मध्वाकौशिको
लिंगोक्तात्रिष्टुप्।ॐमध्वासमंजन्घृतवत्कराथ।अभिधार्योत्संचमुदासयति।उदासयानेः कौशिकोलिंगोक्तागायत्री
।ॐउद्वासयाग्नेः श्टनमकर्महव्यमासीदस्तस्मतस्यधाम।पश्चाद्गार्हपत्यस्यनिधायः अलसासमानेनोत्पुनाति।उत —
गमाभ्यांपवित्राभ्यामुत्पुनाति।विष्णोः कौशिकोविष्णुर्जगती।ॐविष्णोर्मनसापूतमसि।प्रथमं।देवस्त्वाकौशिकः
सविताद्वहती।ॐदेवस्त्वासवितोत्पुनातुद्वितीयं।अच्छिद्रेणकौशिकोलिंगोक्तागायत्री।ॐअच्छिद्रेणत्वापवित्रेणश
नधारेणसहस्रधारेणसुपोत्पुनामि।तृतीयं।तूष्णींचतुर्थं।अरात्स्यद्भिस्वेशने।अरातस्त्वतसो।अथर्वासामः प्रथमा·
त्रिष्टुप्मरुतोनुष्टुभः।ॐअरात्स्यद्भिस्ववनुस्ववसो।मास्मिन्यज्ञेमरुतोमृडनानः।मानोविदद्भिभामोअशस्तिर्मानोवि
दद्वृजिनाद्वेष्यायाः।१।योअद्यसेन्योवधोघायूनामुदीरते।युवंतंमित्रावरुणावस्मद्यावयतंपरि।२।इतश्चपरमुत्त·
श्चपदध्वंवरुणायावय।विमहच्छर्मयच्छवरीयोयावयावधं।३।शासइत्थामहांअस्यमित्रुसाहोअस्तृतः।नयस्यहन्यते एम·
सखानजीयतेकदाचन।४।अग्निर्भ्रस्मामितितिसभिरुपसरमोधात्समेसत्राणिचतुर्थीपुनर्जित्वापंचमीअग्निर्भ्र· ५
स्मामीनिर्दिवोग्निवासाअस्मेसत्राणाथर्वा।गिर्वृणजित्वाकौशिकोलिंगोक्तादेअनुष्टुभोत्ततोपाहृहनोदविष्टु·
भो।ॐअग्निर्भ्रस्मामोषधीष्वग्निमायोविभ्रसाग्निरश्मसु।अग्निरंतःपुरुषेषुगोष्वश्वेष्वग्नयः।१।अग्निवासाः पृ
थिव्यसितज्ञूस्त्विषी।अग्निर्दिवआतपत्यग्नेर्देवःस्योर्वन्तरिक्षं।अग्निमर्त्तासइंधतेहव्यवाहंघृतप्रियं।अग्निवासाः पृथिव्यसितज्ञूस्त्विषी

मंतंसंशितंपाकृणोतु।भस्मांदेवेभ्योदइतिपजंहव्यमरंकृतं।३।अस्मिस्नत्राणिधारयंतमग्नेपुनर्जित्वाब्रह्मणादेम्ये न·
शीर्षि।२।अभ्युंद्रविणोहमद्भ्येमवोचोहविर्देवतासु।५।पुनर्जित्वाब्रह्मणादेमेनहव्यापास्मिवोढवेजातवेदः।२।
धानाःस्तापुमजसः सुवीरेज्योगजीवेमबलिहृतोवयंतव।५।रसितणितोजाग्ना पनमुरपात्रमुपसाद्य।अभिमंत्रयते
।चात्वाध्वयजमाने।तयोरपात्रंकौशिकोलिंगोक्तानुष्टुप्।ॐतयोरपात्रंधारयपथ्यामेब्रह्मणास्पतिः।ससंधमी
अरीधरदेवस्यसवितुःसवे।अथोरकमासिंचतिपवित्रेअंतर्धाय।इदेतेरवो।ॐशिशिप्राकौशिकोलिंगोक्तादेत्रि
ष्टुभो।ॐइदेनवीरेरस्ततंवसानाहिरण्यवर्णाअनवद्यरूपाः।आपःसमुद्रोवरुणाश्चयासांसंपानभागान्विषो·
जुषंता।१।इंद्रमशिष्टावरुणप्रसूताअपःसमुद्रादिवमुद्वहंतु।इंद्रप्रशिष्टावरुणप्रसूतादिवस्पृथिव्याःश्रियमा·
वहंतु।२।पवित्रेतत्रेवरस्येति।ऋतंकौशिकोलिंगोक्तागायत्री।ॐऋतंत्वासत्येनपरिषिंचामिजातवेदः।इतिसहहवि
र्भिःपर्युक्ष्यादेः स्रुक्स्रुवौ।जीवाभिराचम्य।जीवास्थेत्यतसोब्रह्मापोदेअनुष्टुभोगायत्र्युष्णिक्।ॐजीवाःस्थजीव्यासंसर्व
मायुर्जीव्यासं।३।जीवताःस्थजीव्यासंसर्वमायुर्जीव्यासं।४।दिस्त्वमो।त्रिस्त्वंसोमात्मानमभ्युक्ष्य।अनुमंत्रयतेआ —
त्मानंमिंद्रजीवंति।इंद्रजीववृत्रास्त्येगायत्री।ॐइंद्रजीवसूर्यजीवदेवाजीवाजीव्यासमहं।सर्वमायुर्जीव्यासं।स
त्यंबृहदृतमुग्रंदीक्षातपोब्रह्मयज्ञः पृथिवींधारयंति।सानोभूतस्यभव्यस्यपत्न्युरुंलोकंपृथिवीनःकृणोतु।१।असंबाधंमध्यतोमा
नवानांयस्याउद्वतःप्रवतःसमंबहु।नानावीर्याओषधीर्याबिभर्तिपृथिवीनःप्रथतांराध्यतांनः।२।यस्यांसमुद्रउतसिंधु
रापोयस्यामन्नंकृष्टयःसंबभूवुःयस्यामिदंजिन्वतिप्राणदेजत्सानोभूमिःपूर्वपेयेदधातु।३।यस्याश्चतस्रःप्रदिशःपृथि
व्यायस्यामन्नंकृष्टयःसंबभूवुः।याबिभर्तिबहुधाप्राणदेजत्सानोभूमिर्गोष्वप्यन्नेदधातु।४।यस्यांपूर्वेपूर्वजनाविचक्रि

Indira Gandhi National
Centre for the Arts

कौ॰ सू॰ भा॰ स्यस्मां देवा असुरा नभ्यवर्त्तयन् । गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥ ५ ॥ विश्वंभरा वसुधानी प्रतिष्ठा
५ हिरण्यवक्षा जगतो निवेशनी । वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥ ६ ॥ यां रक्षन्त्यस्वप्ना विश्व
दानीं देवा भूमिं पृथिवीमप्रमादं । सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥ ७ ॥ यार्णवेऽधि सलिलमग्र आसीद्यां माया
भिरन्वचरन्मनीषिणः । यस्या हृदयं परमे व्योमन्सत्येनावृतममृतं पृथिव्याः । सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे
८ यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति । सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥ शं तिरा
सुरभिः स्योना कीलालोध्नी पयस्वती । भूमिरधि ब्रवीतु मे पृथिवी पयसा ॥ १० ॥ उदायुषा समायुषोदोषधीनां रसेन ॥
अ१ हं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ ११ ॥ आ पर्जन्यस्य वृष्ट्योदस्थामामृता वयं । अहं सर्वेण पाप्मना वि यक्ष्मेण
समायुषा ॥ १२ ॥ वेदमपभिः प्रपद्यते ॐ प्रपद्ये पंच कौशिको लिंगोक्ता देव्यः हंसो पंक्तिः बृहती पंक्तिः ॐ प्रपद्ये । १ ॐ भूः
प्रपद्ये । २ ॐ भुवः प्रपद्ये । ३ ॐ स्वः प्रपद्ये । ४ ॐ जनत्प्रपद्ये । ५ इति प्रपद्य । आचमनादि प्रपरनांतं सर्वेत्र स्मरणापि
कांयेततः स्थाने गमनं । कर्त्ता पश्चात्तीर्थस्य दर्भान्नास्तीर्य । अहे कौशिको ब्रह्मा गायत्री ॐ अहे दैधिषव्योदतस्तिष्ठ
न्यस्य सदने सीद योऽस्मत्पाकतरः । इति ब्रह्मासनं पश्चीस्तते कर्त्ता निरस्तः कौशिको लिंगोक्तो स्मिक् ॐ निरस्तः पर
एम॰ ५
अपराग्वसु सहपाप्मना निरस्तः सोऽस्तु योऽस्मान् द्वेष्टि । पंचवर्षं द्विष्मः । इति दर्भसिरणात्तृणं निरस्यति सव्यहस्तेन कर्त्ता । अप
उपस्पृश्य । तदत्वालभ्य जपति कर्त्ता । इदमहं कौशिको लिंगोक्ता धृतिः ॐ इदमहमर्वावसोः सदने सीदाम्यृतस्य सदने सीदा
मिसत्यस्य सदने सीदामीष्टस्य सदने सीदामि पूर्तस्य सदने सीदामि मामपदेव वर्हिः । स्वासस्थं त्वा आसदेय पर्णोत्मरम
नभिशोकं ॥ विश्वकर्मा विश्पकर्ता विश्वकर्मा मथर्वा भूमिस्त्रिष्टुप् ॐ विश्वकर्मा दिवा पृथिवी मा वदामि सर्वान्
मित्रस्य णावा स्थाना उर्ध्वो पृष्ठ विष्टम्भनी मन्नभागं भागं घृतत्वाभिनिषीदेम भमे । आसनीयं ब्रह्मजपतं यति
कर्त्ता । बृहस्पतिः कौशिको ब्रह्मा बृहती ॐ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय यद्धृतन्नम

नः शके यम् । उस्मो रक्षेन स्तुवं प्रसाल्य दर्भैः स्रुवन्निर्मृज्य निष्टप्तं कौशिको रक्षो गायत्री । ॐ निष्टप्तं रक्षो निष्टप्ता अराता
यः प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः इति प्रतपनं । अप उपस्पृश्य । मृत्तेस्रुवं गृहीत्वा जपति । विश्वो देवं कौशिको लिंगोक्ते
अनुष्टुप्त्रिष्टुप् ॐ विश्वो देवस्य सविता स्सिराः प्रसवो देवो बृहस्पते । नत्वाहं स्रुवमादरे देवानां हव्यवाहनं । अप स्रुवो वि
दधाति । होमाध्वंदसाजगतेन । सर्वा यजस्य समनक्ति विष्ठावार्हस्पत्येवि शर्म्मणा दैव्येन । स्रुवं वेद्यां कृत्वा दर्भैरग्न्य
धानी स्रुवन्निर्मृज्य निष्टप्तं कौशिः कौरक्षो गायत्री । ॐ निष्टप्तं रक्षो निष्टप्ता अरातयः प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः
इति प्रतपनं । अप उपस्पृश्य । स्रुवं वेद्यां कृत्वा । मनसं गृह्णाति ॐ भूस्त्वा । कौशिको लिंगोक्ताः पंक्तिर्बृहती जगत्य
ष्मिक् ॐ भूः शं भूस्त्वा गृह्णामि भूतये प्रथमं । ॐ भुवः शं पुष्ट्यै त्वा गृह्णामि पुष्ट्यै द्वितीयं ॐ स्वः शं त्वा गृह्णामि सहस्रपोषाय
त्वा । ॐ जनं त्वा गृह्णाम्यपरिमितपोषाय । चतुर्थं । अग्नावग्निश्चरति प्रविष्टः परस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति । पश्चा
दग्नेर्मध्यदेशे समानतत्पुरस्ताद्धोमान् । दक्षिणेनाग्निमुदपात्रमाज्याहुतीनां संपातानानयति । संस्रावी पात्र्यपात्रे
स्याज्याः स्रुवं गृहीत्वा स्रुवेनाज्यधान्या होमाः । पसव्ये कृत्वा इमपात्रस्य नाज्ये धानी माघ्याप्माना व्ये यजमाने जुहो
त्येवं प्रतिवारं । अन्यत्रापि च सर्वत्र होम कर्तुरन्वारंभो यजमानस्य नित्यः । अग्नावग्निश्चरति प्रविष्टः परस्ताद्युक्तो
ऽयं वीति स्थोऽग्ने पंचस्य चक्षुरिणि विश्वकर्मा सर्वाः त्रिष्टुभः ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अभिशस्ति
पा उ । नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्म भागं स्वाहा । इदमग्नये न मम । १ ॐ हृदा पूतं मनसा जात
वेदो विश्वानि देव वयुनानि विद्वान् । सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यं स्वाहा । इदमग्नये । २ ॐ पुरस्ता
द्युक्तो वह जातवेदोऽग्ने विद्धि क्रियमाणं यथेदं । त्वं भिषग्भेषजस्यासि कर्त्ता त्वया गामश्वं पुरुषं सनेम स्वाहा । इदं
मग्नये । ३ ॐ यज्ञस्य चक्षुः प्रभृतिर्मुखं च वाचा श्रोत्रेण मनसा जुहोमि । इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमन
स्यमानाः स्वाहा । इदं विश्वकर्मणे । ४ त्वम्म बृहते कौशिको ग्निस्त्रिष्टुप् ॐ ये स्म बृहते स्वाविदे अग्नये शुक्रं हरामि ते

Indira Gandhi National
Centre for the Arts

कौ॰ सू॰ भा॰ ६ श्रीमते। स नः स्थिरान्नवतः कृणोतु ज्योक्चनो जीवातवे दधातु स्वाहा। इदमग्नये। उत्तरपूर्वार्द्धे आग्नेयमाज्यभागं जुहो-
ति। उदपात्रे संपातानयनपति। दक्षिणपूर्वार्द्धे सोमाय त्वं सोम दिव्यो कौशिकः सोमस्त्रिष्टुपः ॐ त्वं सोम दिव्यो नृचक्षाः सु-
गाँ अस्मभ्यं पथो अनुख्यः। अभिनो गोत्रं विदुष इव नेषो अच्छा नो वाचमुशतीं जिगाय सोमाय स्वाहा। इदं सोमाय। उदपात्रे संपातान-
यनपति। ततः पक्षेभ्यानतानहोमः। सविता प्रसवानामिति कर्मणा कर्मण्यभिनो ध्यानानैराज्यं जुहुयात्। सवि-
ता प्रसवानां सप्तदशधाः थर्वा ब्रह्मकर्मात्मा चतुर्थेकाः दश पः स्वास्तिस्रो ति जगत्यः शेषाः शक्वर्यः। ॐ सविता प्रस-
वानामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्या-
मस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं सवित्रे प्रसवानामधिपतये।१। ॐ अग्निर्वनस्पतीनामधिपतिः स मावतु। अ-
स्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वा-
हा। इदमग्नये वनस्पतीनामधिपतये।२। ॐ द्यावापृथिवी दातॄणामधिपत्नी ते मावतां। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्य-
स्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं द्यावापृथिवीभ्यां दा-
तॄणामधिपत्नीभ्यां।३। ॐ वरुणोऽपामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठाया-
मस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं वरुणायापामधिपतये।४। ॐ मित्रावरुणौ वृष्ट्याधि-
पती तौ मावतां। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्यामस्यामाकूत्यामस्यामाशि- राम॰ ६
ष्यस्यां देवहूत्यां स्वाहा। इदं मित्रावरुणाभ्यां वृष्ट्या अधिपतीभ्यां।५। ॐ मरुतः पर्वतानामधिपतयस्ते मावंतु। अस्मिन्ब्रह्म-
ण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं मरुद्भ्यः
पर्वतानामधिपतिभ्यः।६। ॐ सोमो वीरुधामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रति-
ष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं सोमाय वीरुधामधिपतये।७। ॐ वायुरंतरिक्ष-

स्याधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामा-
शिष्यस्यां देवहूत्यां स्वाहा। इदं वायवेऽन्तरिक्षस्याधिपतये।८। ॐ सूर्यश्चक्षुषामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्क-
र्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं सूर्याय चक्षुषा-
मधिपतये।९। ॐ चंद्रमा नक्षत्राणामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठा-
यामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं चंद्रमसे नक्षत्राणामधिपतये।१०। ॐ इंद्रो दिवो-
धिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामा-
शिष्यस्यां देवहूत्यां स्वाहा। इदमिंद्राय दिवोधिपतये।११। ॐ मरुतां पिता पशूनामधिपतिः स मावतु। अस्मिन्ब्रह्मण्य-
स्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं मरु-
तां पित्रे पशूनामधिपतये।१२। ॐ मृत्युः प्रजानामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधा-
यामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं मृत्यवे प्रजानां म-
धिपतये।१३। ॐ यमः पितॄणामधिपतिः स मावतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायाम-
स्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं यमाय पितॄणामधिपतये।१४। ॐ पितरः परे ते
मावंतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशि-
ष्यस्यां देवहूत्यां स्वाहा। इदं तेभ्यः परेभ्यः।१५। ॐ ततस्ततामहास्ते मावंतु। अस्मिन्ब्रह्मण्यस्मिन्कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां देवहूत्यां स्वाहा। इदं ततायततामह-
हेभ्यः।१७। अप उपस्पृश्य स्रुक्संस्थं संस्रावीपमाज्यं तत्पात्रे कुर्यात्। एतावत्सर्वतंत्रं। मध्ये हविः। उपस्तीर्या-
ज्यं। संहताभ्यामंगुलिभ्यां द्विर्हविषोऽवद्यति मध्यात्पूर्वार्द्धाच्च। पंचावत्तिनां तु पश्चार्धात्। अवदानमभिघार्य।

Indira Gandhi National Centre for the Arts

कौ॰सू॰भा॰
७

दिहिविः प्रत्यभिघारयति॥ वि॰ पंचेपुरस्तादूर्ध्वं संहतां परितो जुहोति। ॐ मुकाय स्वाहा॥ इदं मुकाय न मम॥ उत्तरतो वा॥ वं॥ पुनः
पक्षे स्रुवेणास्याज्येन सप्तदशाः स्यात्ता न होमाः॥ प्राक् स्विष्टकृतः पार्वणहोमो। पूर्णा पश्चादिति पौर्णमास्यां पूर्णा
पश्चादस्य वो पूर्णिमा॥ त्रिष्टुप्। ॐ पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवैः संवसंतो महि
त्वा नाकस्य पृष्ठे समिषा मदेम स्वाहा। इदं पूर्णिमायै। यत्ते देवा अकृण्वन्भागधेयमित्यमावास्यायां। यत्ते देवा अमा-
वास्यावास्या॥ त्रिष्टुप्। ॐ यत्ते देवा अकृण्वन्भागधेयममावास्ये संवसंतो महित्वा। तेना नो यज्ञं पिपृहि विश्ववारे र
यिं नो धेहि सुभगे सुवीरं स्वाहा। इदममावास्यायै। पौर्णमास्यतरः प्राग्भाष्य निर्णीतपार्वणहोमः कार्यः। सम्राड्होमा॥
उपावत्संपातानानयति। आकूत्यादिपंचकौशिकाः लिंगोक्ता स्त्रप स्त्रिष्टुभ ३ स्मिगायत्री ॐ आकूत्यै त्वा स्वाहा। इद
माकूत्यै। १। ॐ कामाय त्वा स्वाहा। इदं कामाय। २। ॐ समृधे त्वा स्वाहा। इदं समृधे। ३। ॐ आकूतिं त्वा कामाय त्वा समृधे त्वा
स्वाहा। इदमाकूत्यै कामाय समृधे। ४। ॐ कृत्वा स्तोमं समर्धय गायत्रेण रथंतरं। बृहत्त्रैष्टुभाय वर्तनि स्वाहा। इदं बृह
त इदं रथंतरं लिंगोक्तदेवतायै। इदं प्रजापतय इति वा। ५। काम्या होमाः। श्येभ्यामानये श्रावणेरः सान्तसारपः अनुष्टु
प् सन्त्यापंक्तयः शिवा बृहत्या। ॐ टाव्यामानये समनमंत्स आधीत। यथा टाव्यामानये सम्मनमन्नेतामसंसन्नम
सन्नमतु। टाव्यो धेनुस्तस्या अग्निर्वत्सः। सा मे ग्निना वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। इद
ं लिंगोक्ताभिः। १। अंतरिक्षाय समनमंत्स आधीत। यथांतरिक्षाय समनमन्नेवामस्यसन्नमः सन्नमंतु। अं
तरिक्षं धेनुस्तस्या वायुर्वत्सः। सा मे वायुना वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। २। ॐ दिवा राम॰
दित्याय समनमंत्स आधीत। यथा दिव्या दित्याय समनमन्नेवामस्यसन्नमः सन्नमंतु। द्यौर्धेनुस्तस्या आदित्यो वत्सः।
सा म आदित्येन वत्सेनेषमूर्जं कामं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। ३। ॐ दिक्षु चंद्राय समनमंत्स आधीत॥
यथा दिक्षु चंद्राय समनमन्नेवामस्यसन्नमः सन्नमंतु। दिशो धेनवस्तासां चंद्रो वत्सः। ता मे चंद्रेण वत्सेनेषमूर्जं का

मं दुहां। आयुः प्रथमं प्रजां पोषं रयिं स्वाहा। इदं लिंगोक्तदेवताभ्य इति चतुर्भ्यो भागाः। ४। प्रजापते न त्वदेतान्यन्य इति वा प्रजा
पतेः। धर्वी प्रजापतिस्त्रिष्टुप्। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु
वयं स्याम पतयो रयीणां स्वाहा। इदं प्रजापतये। उपस्तो यज्ञं। सर्वेषामुत्तरतः सह त्वस्मद्रराय॥ हिरण्यमभिघारय
ति। न हंतोषि आरे वा नाम त्वा ग्निरतिजगती ॐ आरे वा नाम यमपथो अगन्म पछन्नवामत रनुमवा। अग्निर्विद्वां
ति। न हंतोषि आरे वा नाम त्वा। ग्निरतिजगती ॐ आरे वा नाम। यमपथो अगन्म पछन्नवामतरनुमवाउं। अग्निर्विद्वान्
त्स यजात्स इद्धोता सोध्वरांत्स ऋतून्कल्पयाति। अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। उत्तरपूर्वार्धे वयुतं हुत्वा। अ
स्य प्रजात्स इद्धोता सोध्वरांत्स ऋतूंत्स्वपात्सग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। उत्तरपूर्वार्धे वयुतं हुत्वा। अ
प उपस्पर्शनं सर्वेषां। सर्वमायश्चित्तो पान्तोः सोजुहोति। स्वाहेभ्यः स्वाहा कारशाकौशिकः यद्लिंगोक्ताः परमात्माग्नि
वायुसूर्य प्रजापतिस्त्रिष्टुबगायत्री जगती गायत्र्यौ पंक्त्यनुष्टुभो बृहत्यनुष्टुब्जगती पुनर्मैत्विंद्रियं त्रस्यापरमात्मा द्व
तो। ॐ स्वाहेभ्यः स्वाहा। इदमेभ्यः। १। ॐ वषड्ढुतेभ्यः स्वाहा। इदं वषड्ढुतेभ्यः। २। ॐ भेषजेभ्यो स्विष्टेभ्यः स्वाहा। इदं भेषजे
भ्यः स्विष्टेभ्यः। ३। ॐ निष्कृते दुरिष्टेभ्यः स्वाहा। इदं निष्कृते दुरिष्टे। ४। ॐ देवीभ्यस्तनूभ्यः स्वाहा। इदं देवीभ्यस्तनूभ्यः। ५। ॐ अपाश्वा
स्विष्टो। ३। ॐ निष्कृतिरिति स्वाहा। इदं निष्कृते दुरिष्टे। ४। ॐ देवीभ्यस्तनूभ्यः स्वाहा। इदं देवीभ्यस्तनूभ्यः। ५। ॐ अपाश्वा
ग्नेः स्वनभिशस्तिश्च सत्यमित्त्वमया असि। अयासामनसा कृतोऽयासन्हव्यमूहिषे। आ नो धेहि भेषजं स्वाहा। इदमग्न
ये अयासे। ६। ॐ स्वाहा। इदं परमात्मने। ७। ॐ भूः स्वाहा। इदमग्नये। ८। ॐ भुवः स्वाहा। इदं वायवे। ९। ॐ स्वः स्वाहा। इदं सूर्याय। १०।
ॐ भूर्भुवः स्वः स्वाहा। इदं प्रजापतये। ११। ॐ पुनर्मैत्विंद्रियं पुनरात्मा द्रविणं ब्राह्मणं च। पुनरग्नयो धिष्ण्या यथास्थाम कं
ल्पयंतामिहैव स्वाहा। इदं परमात्मने। १२। स्कन्नाः स्कन्ति होमो। यन्मे स्कन्नं कौशिको जातवेदस्त्रिष्टुप्। ॐ यन्मे स्कन्नं म
नसो जातवेदो यद्वा स्कन्नं हविषो यजत्र। उत्सुपोतु विदुषः संजुहोमि सत्याः संतु यजमानस्य कामाः स्वाहा। इदं जातवेद
से। परस्परसथर्वा गिनिस्त्रिष्टुप्। ॐ परस्पा... कर्माकिंचिदग्न उपारिम चरणं जातवेदः। तुतु त्वा हिलानं यथेन शु
से। परस्पर सथर्वा अग्निस्त्रिष्टुप्। ॐ परस्प... कर्माकिंचिदग्न उपारिम चरणं जातवेदः। तुतु त्वा हिलानः यथेन शु
भेस्त्रिविष्टा अमृतत्वमश्नुनः स्वाहा। इदमग्नये। यस्य त्वा ऽऽनमीति संस्थितहोमाः। इदं पात्रे संपातानानयति। यदुपत्वा
ऽग्न्यावद्युदग्नो आयुर्देवतां। यो च त्रिष्टुभः तावाप्रपक्षो नुपंक्ता पंचम्यसेगायत्र्यो। ॐ परस्त्वा पयति यतेअसि ः

Indira Gandhi National Centre for the Arts

कौ·सू·भा· न्होतश्चिकित्वान्नहणीमतीह।ध्रुवमयोध्रुवमुनाश।विषमविद्वान्यज्ञमुपयाहिसोमंस्वाहा।१।ॐसमिंद्रनोमनसानेष
८ गोभिःसंसूरिभिर्हरिवत्संस्वस्त्या।संब्रह्मणादेवहितंयदस्तिसंदेवानांसुमतौयज्ञियानांस्वाहा।२।ॐयानावहउशतोदेवदे
वांस्तान्प्रेरयस्वेअग्नेसधस्थे।जक्षिवांसःपपिवांसोमधून्यस्मैधत्तवसवोवसूनिस्वाहा।३।ॐसुगा नोदेवाःसदनाअ
कर्मयआजग्मसवनेमाजुषाणाः।वहमानाभरमाणास्वावसूनिवसुंघर्मंदिवमारोहतानुस्वाहा।४।ॐयज्ञयज्ञंगच्छयज्ञपतिं
गच्छस्वांयोनिंगच्छस्वाहा।५।ॐएषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीर्यःस्वाहा।६।ॐवषड्ढुतेभ्यःवषडहुतेभ्यःदेवा
गातुविदोगातुंवित्त्वागातुमितस्वाहा।१०मिंद्राग्निभ्यामितिसप्तानांसौगाः।७।मनसस्पतइमंनःचतुर्गृहीतेनमनस
स्पतेःयवीलिंगोक्ताबृहती।ॐमनसस्पतइमंनोदेवदेवेषुयज्ञं।स्वाहावाचिस्वाहा।४।तेनामनसस्पतेःयवीलिंगोक्तासहतिॐमनसस्पतइमन्त्रोदि
विदेवेषुयज्ञंस्वाहादिविस्वाहापृथिव्यांस्वाहांतरिक्षेस्वाहावातेधांस्वाहा।१२।लिंगोक्तदेवताभ्यःततःसप्तावीयपयास्यमाल्य
धाम्नामानीयतस्मिन्नशेषेणास्तीर्णंबर्हिर्मान्नलान्यनक्तिनात्रसंपातःसप्तावीयमाज्यमाज्यधाम्नाहुत्वाबर्हिराज्यरो
येनाक्तंस्तरणाक्रमेणसवेदायाःपृथिव्यैत्वेतिमन्त्रोपृथिव्यैःकौशिकोलिंगोक्ताबृहतीत्रिष्टुबनुष्टुप्।ॐपृथिव्यैत्वांअन
्मिदृक्तत्संमौ।अंतरिक्षायत्वेतिमध्यं।ॐअंतरिक्षायत्वा।अनक्मिदृक्तत्संमौ।दिवेत्वेत्यग्रं।ॐदिवेत्वा।अनक्मिदृक्तत्संमौ
त्रिवामन्त्राद्यतिस्त्रिषु।संबर्हिरक्तमित्यनुप्रहरतियथादेवतं।संबर्हिरस्यथर्वालिंगोक्तापंक्तिः।ॐसंबर्हिरक्तंहविषाघृतेनस
मिंद्रेणवसुनासंमरुद्भिः।संदेवैर्विश्वेदेवेभिरक्तमिंद्रंगच्छतुहविःस्वाहा।१३।लिंगोक्तदेवताभ्यः।१३।परमधानंदेवतारेखाःस एम·
वमग्नेधारयतिरक्षिणेन।परोज्यधाम्नांतत्संस्रावयतिस्रुवेसन्नाज्यधाम्ना।संस्रावभागास्थकौशिकोविश्वेदेवा ८
स्त्रिष्टुप्।ॐसंस्रावभागास्थइषाबृहतःप्रस्तरेष्ठाबर्हिषदश्चदेवाः।इमंयज्ञमभिविश्वेगृणंतःस्वाहादेवाअमृतामाद
यंतांस्वाहा।३।देवेभ्योदेवेभ्यःस्रुवौवाशिकौशिकोलिंगोक्तात्रिष्टुप्।ॐस्रुचौवासिघ्नातदेनिर्णीतःसपत्नस्यपरोरिवेषौ
रांतरिक्षसोरणःपृथिव्यामोरातरोदःहमयासमधारमत्सपत्नाः।इतिस्रुवंप्रागग्रंउत्तरतःधातिवेषामुत्तरतःविमुंचामिको

शिकोलिंगोक्ताःनिजगतो।ॐविषुंचामिब्रह्मणाजातवेदसमग्निंहोतारमजरंरथस्थं।तसर्वेदेवानांजनिमानिवि
द्वान्यथाभागंवहत्वमग्निरग्नयेस्वाहा।इतिसमिधमादधाति।एधोसीतिद्वितीयां।एधोस्यथर्वाग्निस्त्रिष्टुप्।ॐ
एधोस्येधिषीय।समिदसीतितृतीयां।समिदस्यथर्वाग्निर्जगती।ॐसमिदसिसमेधिषीय।तेजोसीतिचतुर्थीं।विमा
र्थीं तेजोस्यथर्वालिंगोक्ताबृहती।ॐतेजोसितेजोमयिधेहि।दक्षिणेनाग्नेरन्वीन्विष्णुक्रमान्क्रमतेविष्णोःक्रमो
सीतिदक्षिणेनपादेनानुसंहरतिसर्वान्।विष्णोःस्त्रिःकौशिकोविष्णुक्रमाअवसानाआद्यद्वेशाक्वर्यौचयाःत्रिजगती
।ॐविष्णोःक्रमोसिसपत्नहापृथिवीसंशितोग्नितेजाः।पृथिवीमनुविक्रमेहंपृथिव्यास्तन्निर्भजामोयोस्मान्द्वे
ष्टियंवयंद्विष्मःसमाजीवीत्तंप्राणोजहातु।१।ॐविष्णोःक्रमोसिसपत्नहांतरिक्षसंशितोवायुतेजाः।अंतरिक्षमनुवि
क्रमेहमंतरिक्षात्तन्निर्भजामोयोस्मान्द्वेष्टियंवयंद्विष्मःसमाजीवीत्तंप्राणोजहातु।२।ॐविष्णोःक्रमोसिसपत्नहाद्यौ
संशितःसूर्यतेजाः।दिवमनुविक्रमेहंदिवस्तन्निर्भजामोयोस्मान्द्वेष्टियंद्विष्मःसमाजीवीत्तंप्राणोजहातु।३।सूर्यस्या
वृत्तसाभिरक्षिणमावर्तते।सूर्यस्यावृतंपंचब्रह्मालिंगोक्ताअनुष्टुबेकापञ्चावसानगायत्री।ॐसूर्यस्यावृतमन्वावर्तेद
क्षिणामन्वावृतं।सामेद्रविणंयच्छतुसामेब्राह्मणवर्चसं।१।ॐदिशोज्योतिष्मतीरभ्यावर्ते।तामेद्रविणंयच्छंतुतामेब्राह्मण
वर्चसं।२।ॐसप्तऋषीनभ्यावर्ते।तेमेद्रविणंयच्छंतुतेमेब्राह्मणवर्चसं।३।ॐब्रह्माभ्यावर्ते।तन्मेद्रविणंयच्छतुतन्मेब्राह्म
णवर्चसं।४।ॐब्राह्मणांअभ्यावर्ते।तेमेद्रविणंयच्छंतुतेमेब्राह्मणवर्चसं।५।अगन्मस्वःस्वरगन्मसंदृशोदिवाहानिर्क्रम्य॥ सरूपंसंसूर्यस्यज्योतिषामःगाम्मा।१।ॐवस्योभूया
अगन्मस्वःस्वःयदोस्मःपूर्वाणायमुत्तरोस्मिन्।ॐअगन्मस्वः।३।स्वरगन्मसंसूर्यस्यज्योतिषागन्म।
यवसुमान्यज्ञोवसुवंशिषीयवसुमान्भूयासंवसुमयिधेहि।२।इंद्रस्यकौशिकोलिंगोक्ताःनुष्टुप्।ॐइंद्रस्यवचसाव
यवसुमान्यज्ञोवसुवंशिषीयवसुमान्भूयासंवसुमपिधेहि।२।इदस्यपरंरुणाग्निमुरूपात्रंपरिलिख्यउत्तरेणाग्निमा
यंमित्रस्यवरुणस्यचाब्रह्मणास्थापितंपात्रंपुनरुत्थापयामसिइदसपरंरुणाग्निमुरूपात्रंपरिलिख्यउत्तरेणाग्निमा
योहिष्ठामयोभुवइतंमाजेपिला।आपोहिष्ठावतस्रःसिंधुद्वीपआपोगायत्र्यः।ॐआपोहिष्ठामयोभुवस्तानऊर्जेद

कौ॰ स॰ भा॰ धानन। महेरणाय चक्षसे। उँ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। २। उँ तस्मा अरंगमाम वो यस्य
९ क्षयाय जिन्वथ। आपो जनयथा च नः। ३। उँ ईशाना वार्याणां क्षयंतीश्चर्षणीनां। अपो याचामि भेषजं। ४। बर्हिषि पत्न्या अं
जलो निनयति समुद्रं वः प्रहिणोमि स्वां योनिमपि गच्छत। समुद्रं च सिंधुद्वीप आपो ऽनुष्टुप्। उँ समुद्रं वः प्रहिणोमि स्वां यो
निमपीतन। अरिष्टास्सर्वहायसो मा च नः किंचनाममत्। ५। इदं जनास इति वा स्क्तेन निनयति। इदं जनास इत्यस्य ब्रह्मा
द्यावापृथिवी देवतो हृत्तोयाम्निगिन एत्तिसोऽनुष्टुभः। उँ इदं जना सो विदथ महद्ब्रह्म वदिष्यति। न तत्पृथिव्या नो दिवि येन
प्राणंति वीरुधः। १। अंतरिक्ष आसां स्थाम श्रांतसदामिव। आस्थानमस्य भूतस्य विदुष्टद्वेधसो न वा। २। यद्रोदसी रेजमा
ने भूमिश्च निरतक्षतं। आर्द्रं तदद्य सर्वदा समुद्रस्येव स्रोत्याः। ३। विश्वमन्यामभीवार तदन्यस्यामधिश्रितं। दिवे च विश्ववे
दसे पृथिव्यै चाकरं नमः। ४। वीरकौशिका लिंगोक्ता गायत्री। उँ वीरं च स्य हंसपासं। इति मुखं विमार्ष्टि पत्नी पत्स्यभावे य
जमानांजलो निनयति। वीरकौशिका लिंगोक्ता जगती। उँ वीरं च स्रषो हंसपासं। इति मुखं विमार्ष्टि यजमानः। व्रतानि
व्रतपतय इति समिधमादधाति यजमानः। व्रतानि कौशिको ग्निरनुष्टुप्। उँ व्रतानि व्रतपतय उपाकरोम्यग्नये। समे
ध्युम्नं वृहदयशो दीर्घमायुः कृणोतु मे। व्रतविसर्गः। सस्तं वर्तेनेति परिधि अविहेति वेदेन। सत्यं कौशिको लिंगोक्ता स्मिक। उँ स
त्यं वर्तेन परिषिंचामि जातवेदः। इति समो। उदस्य वह इति दिशामनुद्राक्षपतिः सर्पणीपात्रं दासिराणा। अस्य कर्मणः सम
र्ध्यं दर्शीपात्रं दक्षिणां कर्तव्य स्तम्यां समविभागेन। ६। हंसंपदेरे। अनादाये वा ब्राह्मणान्भोजयति। अस्य कर्मणः सम राम॰
र्थे ब्राह्मणमेकं भोजयिष्ये। तेन श्री कर्मांगदेवता प्रीयतां। भुमभद्रणा। यस्मात्कोशा दिस्सपन्नयः यस्मात्कोशादु ९
द्भापरमात्मा त्रिष्टुप्। उँ यस्मात्कोशादुदभराम वेदं तस्मिन्नंतरवदध्म एनं कृतमिष्टं ब्रह्मणो वीर्येण तेन मोदेवास्तप
सावतेह। १। पुनर्मैत्विंद्रिय मित्यस्य वाचाः पुनर्मैत्विंद्रियं ब्रह्मा परमात्मा वृहती। उँ पुनर्मैत्विंद्रियं पुनरात्मा द्रविणं
ब्राह्मणं च पुनरग्नयो धिष्ण्या यथा स्थाम कल्पयंतामिहैव चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूयते च पुनर्द्वाभ्यां

कौ॰स॰भा॰ तस्मै यज्ञात्मने नमः यस्य स्मृत्या च नामोक्त्या तपो यज्ञक्रियादिषु न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतं इह विस्लो
१० नतिः प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इति पर्णता प्राचनं कर्म श्रुए
ष्येण अनेनाः मुक्तकर्मणा कृतेन भगवान्यज्ञात्मा महाविष्णुः प्रीयतां उँ विष्णवे नमः इति त्रिर्विष्णुस्मरणं दस
णादानादिसर्वं यजमानं कृत्वा तरतंत्रं। यजमानस्य मांगल्यकरणं आशीर्वादा स्वस्तरानमिति शिवम्। वैदिकानां
हितार्थाय प्रयोगोऽयं मया कृतः। कौशिकाः स्तेन तुष्यंतु संचरंतु सुखेन हि॥ ॥ इति श्रीमन्महायाज्ञिकनागरज्ञा
नीय पाठक श्री रामचंद्रसूनुगंगाधरपाठकवंशसंभूतपाठक श्री वल्लभद्रात्मजमाध्यंदिनीशाखीयमौनमंत्र
सूत्रकदेवभद्रकृते प्रयोगदीपे पर्ववेदीय कौशिकगृह्यसूत्रानुसारेणा कृतं तत्र प्रयोगः पद्धेवभद्रेणानन्यते
कानुवर्तणीयज्ञ मानस्य ब्राह्मणं प्राङ्मुखमुपवेश्य स्वयं यजमान उदङ्मुखः सासनेन दक्षिणहस्तानेणा ब्रा
ह्मणस्य दक्षिणानालभ्य अमुकसगोत्रा अमुकशर्मन् अमुककर्मणां हंयस्य तत्र मत्वं कर्ता भव भवामीति प्रति

Indira Gandhi National Centre for the Arts